This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशायनमः॥छ॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥७॥
अथाख्यातप्रक्रियानिरूप्यते॥धातोः॥वक्ष्यमाणाःप्रत्यया
धातोर्ज्ञेयाः॥चादिः॥तस्यसंज्ञायामित्यादेशादौधातुसंज्ञेभ
वति॥धातुरुक्तिबाह्यः॥सचद्विविधः॥आत्मनेपदी
परस्मैपदीचेति॥तेषांलक्षणमाह॥आदनुदात्त
ङितः॥अनुदात्तेत्तोङितश्चधातोरादिस्यात्मनेपदंभवति॥
त्रिस्वरितेतउ॥त्रितःस्वरितेतश्चधातोरुत्रात्मनेपद
परस्मैपदंभवतः॥आत्मगामिचेत्फलमात्मनेपदं॥पर
गामीचेत्फलंपरस्मैपदंप्रयोक्तव्यमन्यथा॥परतोन्यत्र॥ ॥१॥
पूर्वोक्तनिमित्तविधुरादन्यस्माद्धातोःपरस्मैपदंभव
ति॥नवपरस्मैपदानि॥दिवादीनांमष्टादशसंख्या

चना१
कानामाद्यानिनवपरस्मैपदसंज्ञानिभवंति॥
पराण्यात्मनेपदानि॥पराणिनववचनानिआत्मनेप
दसंज्ञानिभवंति॥वर्तमाने॥तिप्॥तस्॥झि॥सि
प्॥थस्॥थ॥मिप्॥वस्॥मस्॥ताम्॥आताम्॥झ॥थास्॥आथां॥ध्वं॥इट्॥वहि॥महिङ्॥प्रारब्धोपरिसमाप्तिरवर्तमानः
तस्मिन्वर्तमानेचाधिकृतेतिबाद्यःप्रत्ययाभव
न्ति॥अस्यतिबादेःपाणिनियानांलडितिसंज्ञा॥नाम्नि
युष्मदिचास्मदीनांचभागैः॥नामादिषुउपपदेषुसत्सु
चिसिभागैरेतप्रत्ययाभवंति॥नाम्निप्रयुज्यमानेच
शब्देप्रयुज्यमानेपिप्रथमपुरुषोभवति॥युष्मदस्म

Acc. No. 405. M 896.
Title - आख्यात प्रक्रिया (सारस्वत)
Sub. - Grammar.
Date :-
Author -
Pages 114
Checked 2012
KKSU LIBRARY RAMTEK 441 106 M-896 Dist Nagpur
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिरिक्तसिद्धार्थः शब्दो नाम॥ युष्मदिमध्यमः॥ तथैवा
स्मदुत्तमः॥ कारिणोरिपंच॥ परस्मैपदं कर्तरि भवति॥
चकारादात्मनेपदमपि॥ तत्र भूरित्येतस्मात् पादिना
ष्ठिकेरणात्तिबादयो ज्यंते॥ भूसत्तायां॥ तत्रैकत्वावि
वक्षायां प्रथमपुरुषस्यैकवचनं तिप्॥ इति पूर्वे इति स्थि
त॥ पकारः पित्कार्यार्थः॥ अपृक्तं तिप्॥ धातोरपृक्त
स्य यो भवति कर्तरि विहितो बादिषु चतुर्षु दिपूर्वपर्ये
तेषु परतः॥ पकारो विकर्णभेदज्ञापनार्थः॥ गुणः॥ यो
तोरस्य भूतस्य नामिनो गुणो भवति॥ आकारादेशः॥ भवति
स्मर्थे विवक्षायां भूतसद्द इति स्थिते॥ अपि तोदिर्गुणे

ते ४ भिति परे २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पकारेतत्तादिकंचपरंयान्यःप्रत्ययोङिःसंज्ञोभवति॥किंस्य
ध्वसि॥किंतिङ्ङितिचपरेघातोर्गुणोनभवति॥ध्वसंवर्ज्ज
यित्वा॥इतरद्वचनाङसिपरेतुभवति॥ततोङिःचातोर्गुणः सि॰ ३
णप्रतिषेधेप्राप्तेणप्रत्ययेनिमितोगुणोभवति॥स्योवि
सर्गः॥भवतः॥बहुत्वेविवक्षायांभवन्तीतिस्थिते॥
अदे॥अकारस्यलोपोभवतिअकोएकारश्चपरे॥भ
वति॥भवसि॥भवथः॥भवथ॥भवामि॥अकारस्य
आत्वंभवतिवकारेभकारेचपरे॥भवामि॥भवा
वः॥भवामः॥सराजाधार्मिकोभवति॥त्वंसाधुर्भव
सि॥अहमासविद्भवामि॥इत्यादिप्रयोक्तव्यो॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यवधानाच्चपुरुषविशेषः॥सचत्वेसाधुत्वविषयविधिसंभावनयोः॥यात्॥यातां॥युस्॥यातं॥यातं॥यां॥याव॥याम॥ईत॥ईयातां॥ईरन्॥ईथास्॥ईयाथां॥ईध्वं॥ईय॥ईवहि॥ईमहि॥विधिः कर्त्तव्यार्थोपदेशः संभावनं॥कल्पनमर्हस्तत्रयादयः प्रत्ययाभवंति॥लिङिति चैषां संज्ञा पाणिनीयानां॥यो॥अकारासरोयाइर्भवति॥भवेत्॥भवेतां॥युस्॥इट॥अकारासरोस्ययुस्इडागमोभवति॥भवेयुः॥भवेः॥भवेतं॥भवेतां॥ऐयामियं॥अका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रासरोयाभियंभवति॥भवेयं॥भवेव॥भवेम॥शि
ष्योगुरुशुश्रूषकोभवेदितिविधिः॥भवेदसौवेदपा
रगोब्राह्मणस्यादितिसंभावनं॥आशीःप्रेरणयोः॥
तुपूंका॥अंतु॥हितं॥त॥[illegible]॥आनपू॥आम
पू॥तां॥[illegible]॥[illegible]॥आथां॥चं॥ऐपू॥आवहै
पू॥आमहैपू॥अप्रार्थनमाशीःपरस्येष्टार्थंशंस
नंवाप्रेरणंप्रवर्त्तनंतत्रतुबादयःप्रत्ययाभवंति॥
एषांपाणिनियानांसंज्ञालोट्॥तुघोस्तातङ्शि
षिवावक्तव्यः॥डिःत्वंगुणाद्यत्वावायनोयादेशाय॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवतु॥भवतात्॥भवतां॥भवंतु॥अतः॥अकॉसरस्य
हेतुर्भवति॥भव॥भवतात्॥भवतं॥भवत॥भ
वाव॥भवाव॥भवाम॥अयुष्मांश्च भवतु भवान्॥ ॥ ३
अध्ययनायोद्यतो भवसोम्य॥अनद्यतनातीते॥ ॥ ४
दिष्टा॥अन्॥सिप्॥तंत॥अमिप्॥वामातन ॥
आत॥अंत॥थास्॥आथां॥ध्वं॥इ॥मैव॥ह॥म
हि॥अनीतौयारात्रेर्यामद्वयादर्वाग्योवदोग्ग
भिन्याःप्रथमयामद्वयंसोऽध्यनस्तत्तोन्योनध्यन ॥ ४ ॥
स्तस्मिन्सनध्यतनेतीतेऽकाले॥बादयःप्रस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यानवंति॥ एषां पाणिनियानां संज्ञा लङ्॥
दिसिमिरये तेषां मकारउच्चारणार्थः॥
तनोनकारइणुनन्यकर्त्तरि शप्॥ विरोष
णार्थः॥ वावसौ नेइति दकारस्य तकारः॥
दिवादावट्॥ दिवादौ परे धातोरडागमो
भवति॥ अभवत्॥ अभवद्॥ अभवतां॥
अभवन्॥ अभवः॥ अभवतं॥ अभवत॥
अभवं॥ अभवाव॥ अभवाम॥ लोभवत्व

पुनः॥इत्यादि॥एधस्वेत्यत्रोऽकारः॥अ
त्रैपदार्थः॥ततः परागिनवचना
निप्रयोज्यानि॥एवंवदबादिप्रयो
गः॥एधते॥आदथइः॥अकारात्पर
स्यात्रात्र्यथसंबंधीत्रआकारस्यैका
रादेशोभवति॥एधेते॥एधंते॥एधसे॥
एधेथे॥एधध्वे॥एधे॥एधावहे॥एधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महे॥धर्मादेधतेदोराज्यमित्यादि॥वि
धिसंभावनयोः॥ततइतादीनिवच
नानिप्रयोज्यानि॥एधेत॥एधेयातां॥
एधेरन्॥एधेथाः॥एधेयाथां॥एधे
ध्वं॥एधेय॥एधेवहि॥एधेमहि॥
धर्मतःसाधुरेधेत॥आशीषेरणयोः॥
ततःस्वामादिभिनववचनानिप्रयो
ज्यानि॥एधतां॥एधेतां॥एधंतां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वभेदीयसूत्रम् एदेदेप

ईक्षस्व॥एक्षेथां॥एक्षध्वं॥एक्षे॥एक्षावहे॥
हे॥एक्षामहे॥अवयत्तनेतीते॥नेतस्तनो
द्विनिवचनानिप्रयोज्यानि॥स्वरादेः
॥स्वरादेश्चेतीयोडागमोछवतिवि
बादौपरे॥एक्षत॥एक्षेतां॥एक्षंतां॥एक्ष
थः॥एक्षेथां॥एक्षध्वं॥एक्षे॥एक्षावहै॥
ईक्षदर्शनेकृनथः॥अकुरआसनेपदा
थः॥वर्त्तमाने॥ईक्षतां॥ईक्षेतां॥ईक्षंते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईक्षस्वे॥ईक्षेथे॥ईक्षध्वे॥ईक्षे॥ईक्षाव
हे॥ईक्षामहे॥विधिसंभावनयोः॥ईक्षेत॥
ईक्षेयाताम्॥ईक्षेरन्॥ईक्षेथाः॥ईक्षेयाथाम्॥
ईक्षेध्वम्॥ईक्षेय॥ईक्षेवहि॥ईक्षेमहि॥आशी
र्प्रेरणयोः॥ईक्षताम्॥ईक्षेताम्॥ईक्षन्ताम्॥ईक्षस्व॥
ईक्षेथाम्॥ईक्षध्वम्॥ईक्षै॥ईक्षावहै॥ईक्षाम
है॥अनद्यतने॥ऐक्षत॥ऐक्षेताम्॥ऐक्षन्त॥ऐ
क्षथाः॥ऐक्षेथाम्॥[illegible]॥ऐक्षध्वम्॥ऐक्षे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऐच्छावहि॥ऐच्छामहि॥उपचषपाके॥उकारष
कारावनुबंधौ॥कार्यार्थौ॥चकारस्यकारउन्न
यपदार्थः॥एवंवदन्तादबाद्विप्रयोगः॥वर्त्त
माने॥पचति॥पचतः॥पचन्ति॥पचसि॥प
चथः॥पचथ॥पचामि॥पचावः॥पचामः॥
विधिसंभावनयोः॥पचेत्॥पचेतां॥पचेयुः॥
पचेः॥पचेतं॥पचेत॥पचेयं॥पचेव॥पचेम॥
आशीः॥पचतु॥पचतात्॥पचतां॥पचंतु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पच॥पचताद्॥पचतं॥पचत॥पचतं॥पचेव॥पचा
व॥पचाम॥अनद्यतने॥अपचत्॥अपचतां॥
अपचन्॥अपचः॥अपचतं॥अपचत॥अ
पचं॥अपचाव॥अपचाम॥परस्मैपदीयं॥
वर्त्तमाने॥पचति॥पचेते॥पचंति॥पचसि॥
पचेथे॥पचथ॥पचे॥पचावहे॥पचामहे॥वि
धिसंज्ञावनयोः॥पचेत्॥पचेयातां॥पचेर
न्॥पचेथाः॥पचेयाथां॥पचेध्वं॥पचेय॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पचेवहि॥पचेमहि॥आशी॥पचतां॥पचेतां॥
पचंतां॥पचस्व॥पचेथां॥पचध्वं॥पचै॥पचावहै॥पचामहै॥अपचत॥अपचेत॥अपच
तां॥अपचंत॥अपचथाः॥अपचेथां॥अपच
ध्वं॥अपचे॥अपचावहि॥अपचामहि॥इ॥८॥
स्यामन्नेपदि॥इदानीं लुग्विकरणादर्दादिर्ग
णे कर्मरिति बाद्यश्चत्वारो गणा वर्ण्य
ते॥अदभक्षणे॥अकारउच्चारणार्थः॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दादेर्न्नुक्॥ अदादेर्गणोऽन्नस्यापोलुग्भवति॥
खस्वेचपोलुग्स्यात्॥ अत्ति॥ अत्तः॥ अदंति॥
अत्सि॥ अत्थः॥ अत्थ॥ अद्मि॥ अद्वः॥ अद्मः॥ विधि
संभावनयोः॥ अद्यात्॥ अद्यातां॥ अद्युः॥
अद्याः॥ अद्यातं॥ अद्यात॥ अद्यां॥ अद्याव॥
अद्याम॥ आत्तां॥ अत्तु॥ अत्तात्॥ अत्तां॥ अ
दंतु॥ अद्धि॥ अत्तात्॥ अत्तं॥ अदानि॥ अदा
व॥ अदाम॥ अनद्यतने लिटि॥ अदोदिस्यो

अ

= सस्याद्वैः॥ इसाद्वैरस्यैर्ह्रस्वो भवति = ४२

रा.र०२
१११

रडागमोवक्तव्यः॥आदत्॥आत्तो॥आदन्॥
आदः॥आत्त॥आत्त॥आदा॥आद्य॥आद्य॥त्री
ङ्स्वप्न॥ङ्कारआत्मनेपदार्थः॥पूर्वमल्लुगा
दिप्रयोगः॥त्रीङ्॥सर्वत्रशीङोगुणोभवतिशो
ते॥शयाते॥शीङोतोरट्॥त्रीङः॥परस्यातइयं
तस्यरडागमोभवति॥अतोदनतः॥छ्यौतअ
मनेपदस्यातइयंस्याद्भवति॥अनतंअक
राडुत्तरस्यभवति॥शेरते॥शेषेशयाथे॥

इति विभक्तिषष्ठात्२

तो=३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोध्वे॥रोय॥रोवहे॥रोमहे॥विधिसंभाव
नयोः॥रायीत॥रायीयातां॥रायीरन्॥रा
यीथाः॥रायीयाथां॥रायीध्वं॥रायीय॥रा
यीवहि॥रायीमहि॥अनद्यतने॥अरोत॥
अरौयातां॥अरोरन्॥अरोथाः॥अरौया
थां॥अरोध्वं॥अरौय॥अरोवहि॥अरो
महि॥[illegible]

=आशीर्लिङि॥रोतां॥रोयातां॥रोरन्॥रोषीष्ट॥रोयास्थां॥रोध्वं॥
=[illegible]रोय॥रोयावहे॥रोयामहे॥४

अबादावीत्यतिस्मि॥ब्रुवईप्रत्ययोत्रीति॥ सकार२तकार२दकार२मकारादौअव्यवहितेपितिचपरे॥
अबादौविषयेगुणावादेशौ॥वर्त्तमाने॥ब्र
वीति॥ब्रूतः॥सर्धौतोरियुवौस्वरेयोवति
अनुवर्त्तमाने॥उवौतोः॥विकरणस्यनोधो
तोस्त्रेवर्णोवर्णयोरियुवौभवतः॥ङिति स्वरे
परे॥अनेकस्वरस्यासंयोगपूर्वस्यस्वा॥
तुराद्वातक्वचिदेकस्वरस्यापियकारःसमाश्रितः॥ तु ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नानप्योर्वः॥असंयोगपूर्वस्यानेकस्वरस्यधा
तोरनपिविषयेउवर्णस्यवत्वंनभवति॥यथा
जुहुतीत्यादि॥ब्रुवति॥ब्रवीषि॥ब्रूथः॥ब्रू
थ॥ब्रवीमि॥ब्रूवः॥ब्रूमः॥[illegible]॥ब्रूतां
ब्रुवाते॥ब्रुवते॥ब्रूषे॥ब्रुवाथे॥ब्रूध्वे॥ब्रुवे॥
ब्रूवहे॥ब्रूमहे॥इत्यात्मनेपदेपि॥ब्रूवआ
हुश्चपचानां॥ब्रूवउत्तरेषांतिबादीनांपरं चार
नाणपू॥अतुस्॥थस्॥अथुस्॥इत्येतपं
उस्॥पू॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चादेशा भवंति॥ ब्रुवआहश्चादेशो भवति॥ण
कारोऽध्यर्थः॥ आह॥ आहतुः॥ आहुः॥ तथो
परि२ ॥थकारे ब्रुवोहकारस्य तकारादेशो भवति॥
आथ॥ आहथुः॥ विधि॥ ब्रूयात्॥ ब्रूयाताम्॥
ब्रूयुः॥ ब्रूयाः॥ ब्रूयातम्॥ ब्रूयात॥ ब्रूयाम्॥ ब्रूया
व॥ ब्रूयाम॥ ब्रुवीत॥ ब्रुवीयाताम्॥ ब्रुवीरन्॥ ब्रुवी
थाः॥ ब्रुवीयाथाम्॥ ब्रुवीध्वं॥ ब्रुवीय॥ ब्रुवीवहि
॥ ब्रुवीमहि॥ आशि॥ ब्रवीतु॥ ब्रूताम्॥ ब्रूतां॥ ॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रुवंतु॥ब्रूहि॥ब्रूतात्॥ब्रूत॥ब्रूतात्॥ब्रवाणि
ब्रवाव॥ब्रवाम॥ब्रूतां॥ब्रूवातां॥ब्रूवंतां॥ब्रू
ष्व॥ब्रूवाथां॥ब्रूध्वं॥ब्रवै॥ब्रूवावहै॥ब्रूवा
महै॥अब्रवीत्॥अब्रवीद्॥अब्रू
तां॥अब्रूवन्॥अब्रवीः॥अब्रूतं॥अब्रूत
अब्रूवम्॥अब्रूव॥अब्रूम॥अब्रूतां॥अब्रू
वातां॥अब्रूवत॥अब्रूथाः॥अब्रूवाथां॥अब्रू
ध्वं॥अब्रूवि॥अब्रूवहि॥अब्रूमहि॥लुङि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साहीता

करणस्यापिजुहोत्यष्टिगणस्यविशेषः॥ऊष्मानादन्
येः॥हादेर्द्विश्च॥ऊष्मादेर्गणाऊष्मन्नस्यापोन्तुच
वति॥सति तस्मिन्घोषो हिवचनं॥सस्वरआदिर्द्वि
रादिः॥सस्वरआद्योवयवोद्विरुक्तोद्विर्भवति॥कु
होश्चुः॥एर्वसंबंधिनोकवर्गहकारयोश्चुत्वंभवति॥हका
रस्यचुत्वेप्राप्तेसर्वगस्यचतुर्थः॥झषानांजबडजगः॥सर्वस्व
बंधिनांझषानांजबडजगाभवंति॥झडुपधानांज
डदगबाभवंति॥खफछठथानांचटतकपाभवंति॥जुहोति
जुहुतः॥ढः॥द्विरुक्तादुत्तरस्यांतइयस्याढ़ंभवति॥जुहू

॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति॥जुहोषि॥जुहुथः॥जुहुथ॥जुहोमि॥ओकोवीलोपः॥
अस्यसंबंधिनउकारस्याकोःपरयोर्वीलोपोभवति॥
क्वचिदन्यत्रापि॥जुहुः॥जुहुवः॥जुहुमः॥
विधि॥जुहुयात्॥जुहुयाताम्॥जुहुयुः॥जुहुयाः॥जुहु
यातं॥जुहुयातं॥जुहुयां॥जुहुयाव॥जुहुयाम॥छंदसि
तिबादिषु[illegible]वोवावक्तव्यः॥अग्निहोत्रंजुहोति॥पाणिना
नासंज्ञालोपः॥आशीषिरणयोः॥जुहोतु॥जुहुतात्॥
जुहुतां॥जुहुतु॥जुहुधि॥उत्तरस्यहेर्धिवक्तव्यः॥जु[illegible]
जुहुतात्॥जुहुतं॥जुहुतं॥जुहवानि॥जुहवाव॥जुहुमेवो॥

४ धि

२ हेर्धिः

अडेरेतिवाचंयथाजुहुरन्=२ =पुसंवर्जेइत्या=२

अनद्यतनेवृते॥अजुहोत्॥अजुहोद्॥अजुहुतां॥अनउस्॥
द्विरक्ताउत्तस्यअनउसभवति॥गुणावादेशौ॥अजुहवुः॥अ
जुहोः॥अजुहुतं॥अजुहुत॥अजुहवं॥अजुहु॥अजुहुव॥
अजुहुम॥ओहाङ्गतौ॥ङ्कारआत्मनेपदा
र्थः॥ओकारआदिकार्यार्थः॥हातेरिति स्थिते॥द्विवचनादि
सर्ववत्ह्रस्वः॥सर्वसंबंधिनोदीर्घस्यह्रस्वोभवति
वति॥म्छ्यांलुक्॥डुभृञ्धारणपोषणयोः॥ओहाङ्गतौमा
ङ्मानेइत्येतेषांसर्वस्याकारस्यकारादेशोभवति॥लुकि
सति॥द्वेस्तोलोपोनुवर्त्ततेईकारश्च॥द्विरक्तस्यधातोराकार

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यलोपो भवति ङि तिस्वरेपर ईकारश्च ङि तिहस्वपरे ॥ जि
हीते ॥ जिहाते ॥ जिहते ॥ जिहीषे ॥ जिहाथे ॥ जिहीध्वे ॥ जि
हे ॥ जिहावहे ॥ जिहीमहे ॥ विचिस्वप्नादिनयोः ॥ जिहीत ॥
जिहीयातां ॥ जिहीरन् ॥ जिहीथाः ॥ जिहीयाथां ॥ जिहीध्वं ॥
जिहीय ॥ जिहीवहि ॥ जिहीमहि ॥ आशी० ॥ जिहीतां ॥ जि
हातां ॥ जिहतां ॥ जिहीष्व ॥ जिहाथां ॥ जिहीध्वं ॥ जिहै ॥
जिहावहै ॥ जिहामहै ॥ अन० ॥ अजिहीत ॥ अजिहातां ॥ जि २
अजिहत ॥ अजिहीथाः ॥ अजिहाथां ॥ अजिहीध्वं ॥ अजि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हो हो

हि॥ अजिहैवहि॥ अजिहैमहि॥ ओहाकृस्यागे॥ वर्त्तमाने॥
जहाति॥ जहीतः॥ जहति॥ जहासि॥ जहीथः॥ जहीथ॥
जहामि॥ जहीवः॥ जहीमः॥ विधि॥ जाहातेर्यासेदे
वालोपोवक्तव्यः॥ जह्यात्॥ जह्यातां॥ जह्युः॥ जह्याः॥
॥१४॥ जह्यात॥ जह्यात॥ जह्यां॥ जह्याव॥ जह्याम॥ आशि॥
जहातु॥ जहीतात्॥ जहीतां॥ जहतु॥ ईवोहे॥ जहाते
हेपरेवाइकारइकारश्चभवतीति॥ जहिहि॥ जहाहि॥
जहीहि॥ जहीतात्॥ जहात॥ जहीत॥ जहानि॥ जहाव॥१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जहोम॥अनद्यतनेतीते॥अजहात्॥अजहीतां॥उस्या
त्रोपः॥उसिपरेधातोसकारस्य लोपोभवति॥अनूउस्॥
अजहुः॥अजहाः॥अजहीतं॥अजहीं॥अजहां॥अज
हीव॥अजहीम॥डुभृञ्धारणपोषणयोः॥रः॥सर्वसंव
धिनऋकारस्याकारादेशोभवति॥बिभर्त्ति॥बिभ्रतः॥
बिभ्रति॥बिभर्षि॥बिभृथः॥बिभृथ॥बिभर्मि॥बिभृवः॥
बिभृमः॥आत्मने॰॥बिभ्राते॥बिभ्रते॥बिभृषे॥बिभ्रा
थे॥बिभृध्वे॥बिभ्रे॥बिभृवहे॥बिभृमहे॥विधि॰॥बि
भृयात्॥बिभृयातां॥बिभृयुः॥बिभृयाः॥बिभृयातं॥
बिभृयात्॥बिभृयां॥बिभृयाव॥बिभृयाम॥आत्मनेप॰॥
बिभृतां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बिभ्रीत॥बिभ्रीयातां॥बिभ्रिरन्॥बिभ्रीथाः॥बिभ्रीया
थां॥बिभ्रीध्वं॥बिभ्रीय॥बिभ्रीवहि॥बिभ्रीमहि॥आशी॰॥
बिभर्तु॥बिभृताद्॥बिभृतां॥बिभ्रतु॥बिभृहि॥बिभृ
ताद्॥बिभृतां॥बिभृत॥बिभराणि॥बिभराव॥बिभ
राम॥बिभृतां॥बिभ्रातां॥बिभ्रतां॥बिभृष्व॥बिभ्राथां॥
बिभृध्वं॥बिभरै॥बिभरावहै॥बिभरामहै॥अन॰॥दि
स्योर्हस्वः॥हस्वादुत्तरयोर्दिप्सिपालोपो भवति॥
अबिभः॥अबिभृतां॥अबिभरुः॥अबिभः॥अबिभृ
तं॥अबिभृत॥अबिभरं॥अबिभृव॥अबिभृम॥आ
त्म॰॥अबिभृत॥अबिभ्रातां॥अबिभ्रत॥अबिभृथाः॥

॥१५॥

॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविभ्रथां॥अविभ्रध्वं॥अविभ्रि॥अविभ्रवहि॥अवि
भ्रमहि॥माङ्माने॥वर्त्तमाने॥मिमीते॥मिमाते॥मि
मते॥मिमीषे॥मिमाथे॥मिमीध्वे॥मिमे॥मिमीवहे॥
मिमीमहे॥विधि॥मिमीत॥मिमीयातां॥मिमीरन्॥
मिमीथाः॥मिमीयाथां॥मिमीध्वं॥मिमीय॥मिमीव
हि॥मिमीमहि॥आशिषि॥मिमीतां॥मिमातां
मिमतां॥मिमीष्व॥मिमाथां॥मिमीध्वं॥मिमै॥मिमा
वहै॥मिमामहै॥अनद्यतने॥अमिमीत॥अमि
मीयातां॥अमिमत॥अमिमीथाः॥अमिमाथां॥अमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मीध्॥ अमिमी॥ अमिमीवहि॥ अमिमीमहि॥ डुदाञ्
दाने॥ ञकारउभयपदार्थः॥ डुकारोऽनुकार्यार्थः॥
दाति इति स्थिते॥ सर्वादिर्वचेरं॥ ऋच्चः॥ दाऽदाति॥
दादेः॥ द्विरुक्तस्य दादेराकारस्य लोपो भवति ङिति परे
॥ स्वरे च पा॥ ददति॥ ददासि॥ दद्वः॥ दद्व॥ ददामि॥
दद्वः॥ दद्मः॥ विधि॥ दद्यात्॥ दद्याता॥ दद्युः॥ दद्याः
दद्यातं॥ दद्यात॥ दद्यां॥ दद्याव॥ दद्याम॥ आशी॥
ददतु॥ दत्ताद्व॥ दत्तं॥ ददतु॥ देहि॥ दादीनां हेप
रे परे वस्य लोपो भवति आतो राकारस्य चकारो भव

५ दत्तः॥

॥१६॥

॥१६१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति॥देहि॥दत्तात्॥दत्तं॥दत्त॥ददानि॥ददाव॥ददाम॥
अन॰॥अददात्॥अदत्तां॥अददुः॥अददाः॥अदत्त॥अ
दत्त॥अददं॥अदद्व॥अदद्म॥आत्मनेपदेषि॥सर्ववद
कारलोपः॥दत्ते॥ददाते॥ददते॥दत्से॥ददाथे॥दध्वे॥द
दे॥दद्वहे॥दद्महे॥विधि॰॥ददीत॥ददीयातां॥ददीर
न्॥ददीयाः॥ददीयाथां॥ददीध्वं॥ददीय॥ददीवहि॥
ददीमहि॥आशी॰॥दत्तां॥दत्तां॥ददतां॥दत्स्व॥ददाथां॥
दध्वं॥ददै॥ददावहै॥ददामहै॥अनद्यतनेतीते॥अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दत्त॥अददातां॥अददत॥अदत्था॥अददायां॥अदध्वं॥
अददि॥अददृहि॥अदमहि॥डुधाञ्धारणपोषणयोः॥
अकारउभयपदार्थः॥ह्लादेर्हिश्च॥ह्रस्वः॥सपानांज्ञ[illegible]स्य
बचपाइतिसूत्रेणधकारस्यदकारःगीतस्यदकारेवर्त्तमाने
एवः॥धकारोभवतिससेपरे॥दधाति॥सर्वस्याङ्ति
ससेधाः॥धातोर्ह्रस्वांतस्याङ्तिइत्यपरेसर्वदकारे
स्यधकारादेशोभवति॥धत्तः॥दधति॥द
धासि॥धत्थः॥धत्थ॥दधामि॥धध्वः॥धध्मः॥धत्ते॥ ॥१७

१७॥

६१ ६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दधाते॥दधते॥धत्से॥दधाथे॥धध्वे॥दधे॥दध्व
हे॥दध्महे॥विधिसंभावन॥दध्यात्॥दध्यातां॥दध्यु
र्दध्याः॥दध्यातं॥दध्यात॥दध्यां॥दध्याव॥दध्याम॥
दधीत॥दधीतयातां॥दधीरन्॥दधीथाः॥दधीयाथां
॥दधीध्वं॥दधीय॥दधीवहि॥दधीमहि॥आशी॥
दधातु॥धत्तां॥धत्तां॥दधतु॥धेहि॥धत्तं॥धत्त
॥धत्तं॥दधानि॥दधाव॥दधाम॥धत्तां॥दधातां॥
दधतां॥धत्स्व॥दधाथां॥[redacted]धध्वं॥धैधे॥धध्व

द द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारस्वति = तेजोर्चिर्गौर्ध्वरिः प्रचारतिउज्जयः॥४ अधुनायविकरणाधात्वः
= प्रदर्शयंते॥५ शोभारस्ताशोभा =

अदधादु

वहे॥दधामहे॥अनेन॥अदधात्॥अधत्तां॥अदधुः॥
अदधाः॥अधत्तं॥अधत्त॥अदधां॥अदध्व॥अदधि॥
अधत्त॥अदधाताम्॥अदधत॥अदध्वाः॥अदधाथां॥
अदध्वं॥अदध्वि॥अदध्वहि॥अदध्महि॥दिवुँ क्रीडा
विजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्ति
॥१८॥३ गतिषु॥उकाउदिक्कार्यार्थः॥दिवतिइतिस्थितं॥
दिवोर्द्यः॥दिवामदेर्गणीयःप्रययोक्तस्तिचतुर्षुपदेषु॥
अपोपवादः॥ज्ञोर्विहसइतिदीर्घः॥दीव्यति॥दीव्य

॥१८॥

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शमादीर्घः॥शमादीनांधातुनांदीर्घौ भवतिअंबादेविच्छये॥

नः॥दिव्यति॥दीव्यसि॥दीव्यथः॥दीव्यथ॥दीव्यामि॥दीव्या
वः॥दीव्यामः॥दिव्यि॥दीव्येत्॥दीव्येतां॥दीव्येयुः॥दीव्येः॥
दीव्येतं॥दीव्येत॥दीव्येयं॥दीव्येव॥दीव्येम॥अदीव्यी॥दी
व्यतु॥दीव्यस्तु॥दीव्यतां॥दीव्यंतु॥दीव्य॥दीव्यताद्॥दी
व्यतं॥दीव्यत॥दीव्यानि॥दीव्याव॥दीव्याम॥अन॥अदी
व्यत्॥अदीव्यतां॥अदीव्यन्॥अदीव्यः॥अदीव्यतं॥अदी
व्यत॥अदीव्यं॥अदीव्याव॥अदीव्याम॥इत्यादिलवातव
कृत्रेयं॥त्रासोदेवीयःप्रत्ययोवक्तव्यः॥त्रासयते॥त्रास
ते॥भ्रम्यति॥भ्रमति॥क्रम्यति॥क्रमति॥त्रुटति॥त्रुट

भ्रासदीप्तौ २

चमुबलने १ कुमुकोतौ १ तृसंबलने १ त्रुटोरमे १

२२ कार व

ति॥इत्यादयः॥षुञ्॥अभिषेवे॥आदेःसः स्नः॥धातोरादौ
वर्त्तमानयोःषकारणकार्योःसकारनकारौभवतः॥सुनोतिइति
स्थिते॥सर्ववर्त्तिबाध्यः॥स्वादेर्नुः॥स्वादेर्गणान्नुःप्रत्य
योभवतिचतुर्षुपरेषु॥प्रागस्तिप्रयोगः॥आदेश्चतथातौ
सुनुमः॥आदेरुपसर्गस्थरेषांस्वादीनांनमीदीनांचधात्वर
॥१९॥ नांसकारनकारयोस्तौपूर्वत्रविनावेवषकारणकारौभवतः॥
तथातेष्वेवभिन्नेषुस्वस्तुनरपः॥विकरणस्यर्णेनुप्रत्यंस्यउपूर्व२
प्रत्यंस्यचगुणोभवतिपितिपरे॥अभिषुणोतिसोमंसो ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असुनुतां॥असुनुतां॥असुनवं॥असुन्वा॥असुनुव॥असुन
असुनुमा॥आत्मनेपदी॥सुनुते॥ सुन्वाते॥सुनुतां॥असु
नुत॥असुन्वातां॥असुन्वत॥असुनुथाः॥सुअसुन्वा
थां॥असुनुध्वं॥असुन्वि॥असुनुवहि॥असुन्वहि॥अ
सुनुमहि॥असुनुहि॥असुन्वातो॥असुनुते॥असुन्वाते॥
नुधाता॥असुनुतो॥असुनुथे॥असुनुथ॥असुनुध्वे॥असुनु
वा॥असुनुवहे॥असुनुमहे॥बीचि०॥असुनुवीतां॥असुनु
वातां॥असुनुवीरन्॥असुनुवीथाः॥असुनुवीथां॥असुनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्वं॥अश्नुवीय॥अश्नुवीवहि॥अश्नुवीमहि॥आशी॥अश्नुतां॥
अश्नुवातां॥अश्नुवतां॥अश्नुष्व॥अश्नुवाथां॥अश्नुध्वं॥अ
श्नवै॥अश्नवावहै॥अश्नवामहै॥अनद्यतने लीटि॥आश्नुत॥
आश्नुवातां॥आश्नुवतां॥आश्नुथाः॥आश्नुवाथां॥आश्नुध्वं॥
वी४ आश्नवं॥आश्नुवहि॥आश्नुमहि॥रधिर् आवरणे॥इरयु
वधि इरितो वा॥तिबिवेणार्थः॥रध इरिश्च ते॥रधं व
त्तिबादयः॥रधादेर्नम्॥रधादेर्णान्नम् प्रत्ययो भवति॥
चतुर्थ्यपरेषु॥मकारः स्थानविध्यर्थः॥तथोर्हः॥ससांतस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारस्वत

क्र २ भे १

धातोरुपरयोस्तकारथकारयोर्ढकारादेशोभवति॥ ह्यौ जबाः॥
णत्वंचारणाद्धु॥ रमरसोस्यानमूद्रयेतस्यविकारणस्यास-
ह्युविधातोश्चारस्यलोपोभवतिङितिपरे॥ रुद्धः॥ रुध्वं
ति॥ रुणद्धि॥ रुद्धः॥ रुद्ध॥ रुणध्मि॥ रुध्वः॥ रुध्मः॥ रु
ध्यात्॥ रुध्यातां॥ रुध्युः॥ रुध्याः॥ रुध्यातं॥ रुध्यात॥ रुध्यां॥
रुध्याव॥ रुध्याम॥ आवी॥ रुणद्धु॥ रुद्धात्॥ रुद्धं॥ रुध्यतु॥
रसाद्धेः॥ रुद्धि॥ रुद्धात्॥ रुद्धं॥ रुद्ध॥ रुणधानि॥ रु
व॥ रुध्याम॥ दिस्योर्हसात्॥ हसाद्उत्तरयोर्दीर्घासिप्रदये

२१ २१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ ह्ये

तयोर्लोपो भवति॥ वावसाने इति विकल्पेन चकारस्य द
कारतकारौ॥ अरूणत्॥ अरूणद्॥ अरूद्धां॥ अरूंध्व
न्॥ मध्यमएकवचने सिपि लुक्ते धकारस्य विकल्पेन॥ धकारे
दः सः॥ दकारस्य सकारो भवति सिपि परे॥ सस्य रुत्वो
हो र्विर्गः॥ अरूणः॥ अरूणत्॥ अरूणद्॥ अरूद्धं॥ अरूं
द्धं॥ अरूणधं॥ अरूंध्वं॥ अरूंध्वं॥ रूंद्धे॥ रूंधाते॥ रूंध्वं
ते॥ इत्यादि॥ रूंधातु॥ रूंधीयातां॥ रूंधीरन्॥ रूंधीथा
रूंत्सु॥ रूंधाथां॥ रूंद्धां॥ रूंधां॥ रूंध्वं॥ रूंधै॥ रूंध्वहै॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मयाजी॥ सुनुतः॥ सुन्वंति॥ सुनोषि॥ सुनुथः॥ सुनुथ॥ सु
नोमि॥ ओर्गुणवालोपः॥ सुन्वः॥ सुनुवः॥ सुन्मः॥ विधिसंज्ञा॰ सुनुमः॥
सुनुयात्॥ सुनुयाताम्॥ सुनुयुरित्यादि॥ आशीः॥ सुनोतु॥
सुनुवाद्॥ सुनुताम्॥ सुन्वंतु॥ ओर्गुणः॥ प्रयसंबधिनउकाडे रो
तस्य रस्य हेत्वंतस्य ति॥ वाग्रहणात्संयोगादुत्तरस्य तस्य च र॰ न॰ ४८
क्षरन्हंकरणेरस्य तस्य तस्य हस्य त्र न स्यति॥ सुनु॥ सु रयति
नुतात्॥ सुनुतम्॥ सुनुत॥ सुनवानि॥ सुनवाव॥ सुनवाम॥ तेना
अनयत॥ असुनात्॥ असुनुताम्॥ असुनवन्॥ असुनाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



रूडुं॥रूध्यातं॥रूंध्यतां॥अरूध्य॥इत्यात्मनेपदे॥तनुस्ता
रे॥उकारउच्चारणार्थः॥तनादेरुत्॥तनादेर्गणादुपूर्वस्यो
भवतिचतुर्थुपरेषु॥अपोपवादः॥पकारस्तिपत्कारियार्थः
रूपइतिगुणः॥तनोति॥तनुयात्॥तनोतु॥तनुताद्॥त
नुतां॥तन्वंतु॥तनु॥तनुतात्॥तनुतं॥तनुत॥तन्वानि॥
तन्वाव॥तन्वाम॥अतनोत्॥अतनुतां॥अतन्वन्॥अत
नोः॥अतनुतं॥अतनुत॥अतन्वं॥अतन्व॥अतनुव॥अ

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्म॥अतनुम॥इत्यादिआत्मनेपदे॥तनुते॥तन्वाते॥त
न्वते॥तनुषे॥तन्वाथे॥तनुध्वे॥तन्वे॥तनुवहे॥तनुमहे॥
तन्वीत॥तन्वीयातां॥तन्वीरन्॥तन्वीथाः॥आज्ञा॥तनु
तां॥तन्वातां॥तन्वतां॥तनुष्व॥तन्वाथां॥तनुध्वं॥तनवै
तनवावहै॥तनवामहै॥अनद्यतने॥अतनोत॥आत्मने॥अतनु त
त॥अतन्वातां॥अतन्वत॥अतनुथाः॥अतन्वाथां॥अतन
नुध्वं॥अतन्वि॥अतन्वहि॥अतन्महि॥

अतनुवह १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुनोतिव न्नेयाडु ञ्चकरणे।सर्वमदनुबंधलोपा
त२ र्थौनादेस्पर्कारस्यगुणोअर्।पुनर्नेरइति गु
ण:॥करोति॥ ङ्यडु॥ व
२३ करोतेरकारस्यउकारोभौतङ्ति।विकरणौपरत:॥
कुरुत:॥कुर्वति॥करोषि॥कुरुथ:॥कुरुथ॥करोमि॥
रुत्रोनियंवमोपरयौकारस्यलोपोवक्तव्य:॥कुर्व:॥कुरुव:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृञ्सः २

कुर्मः॥ रुवोयेः॥ रुअउत्तरस्यउकारस्यलोपोभवतिय
कारेपरे॥ कुर्यात्॥ कुर्यातां॥ कुर्युः॥ इत्यादि॥ आज्ञा॥
करोतु॥ कुरुताद्॥ कुरुतां॥ कुर्वंतु॥ कुरु॥ कुरुताद्धि॥ कुरु
तं॥ कुरुत॥ करवाणि॥ करवाव॥ करवाम॥ अकरोत्॥ अ
कुरुतां॥ अकुर्वन्॥ अकरोः॥ अकुरुतं॥ अकुरुत॥ अकुरवं॥
अकुर्व॥ अकुर्म॥ इत्यादि॥ आत्मनेपदि॥ कुरुते॥ कुर्वाते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुर्वते॥कुर्वीत॥कुर्वीयातां॥कुर्वीरन्॥कुरुतां॥कुर्वा
तां॥कुर्वतां॥कुरुष्व॥कुर्वीथां॥कुरुध्वं॥करवै॥कर
वावहै॥करवामहै॥अकुरुत॥अकुरुतां॥अकुर्वत॥
२४ अकुरुथाः॥इत्यादि॥तुदयथने॥तुदादेरः॥तुदादेर्ग
णादकारप्रत्ययान्तवति॥चतुर्षुपरेषु॥अपोपवादः॥
तुदति॥तुदतः॥तुदंति॥तुदसि॥तुदथः॥तुदथ॥ २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुदंतु ॥

तुदाम्प्रा॥तुदावः॥तुदामः॥तुदेत्॥तुदेतां॥तुदेयुः॥तुदेः॥
तुदेतं॥तुदेत॥तुदेयं॥तुदेव॥तुदेम॥आशी॥तुदतु॥
तुदताद्धा॥तुदतां॥तुदा॥तुदतादा॥तुदंतु॥तुदत॥
तुदतं॥तुदानि॥तुदाव॥तुदाम॥अस्यतने॥अतु
दत्॥अतुदतां॥अतुदन्॥अतुदः॥अतुदतं॥अ
तुदत॥अतुदं॥अतुदाव॥अतुदाम॥आस्मनेपदी॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुदेते॥तुदेते॥तुदंते॥विध्य॰॥तुदेत॥तुदेयाताम्॥तुदेर
न्॥आशी॰॥तुदतां॥तुदेतां॥तुदंतां॥अनद्य॰॥अतु
तु ५ दत॥अतुदेतां॥अदंत॥अतुदथाः॥इत्यादिर्भवतु ज्ञेयं॥
तुक्तीत्रइत्यविनीस्य॥अनुबंधलोपादिसर्वत्र॥
नाश्यादेः॥ऋदेर्गुणान्नाश्रयस्यो भवतिचतुर्षुपरे
षु॥ऋीणाति॥इहसे॥नाइस्यस्याकारस्य इत्वंभव

२५ २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्या

तिङि॰ति हस्ये परे॥ क्रीणीतः॥ नाताः॥ नाइयकारस्य लेपो
भवति ङि॰ति स्वरे परे॥ क्रीणंति॥ क्रीणासि॥ क्रीणीयाः॥
क्रीणीथ॥ क्रीणामि॥ क्रीणीवः॥ क्रीणीमः॥ ध्वधि॰॥ क्री
णीयात्॥ क्रीणीयातां॥ क्रीणीयुः॥ क्रीणीयाः॥ क्रीणी
यातं॥ क्रीणीयात॥ क्रीणीयां॥ क्रीणीयाव॥ क्रीणीया
म॥ क्रीणातु॥ क्रीणीताद्॥ क्रीणीतां॥ क्रीणंतु॥ क्रीणी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि॥क्रीणीताद्॥क्रीणीतं॥क्रीणीत॥क्रीणीतं॥क्रीणानि॥क्रीणाव॥
क्रीणाम॥अक्रीणात्॥अक्रीणीतां॥अक्रीणन्॥अक्रीणाः॥
अक्रीणीतं॥अक्रीणीत॥अक्रीणां॥अक्रीणीव॥अक्रीणा
म॥इयादि॥आत्मनेपदेपि॥क्रीणीते॥क्रीणाते॥क्रीण
ते॥क्रीणीषे॥क्रीणाथे॥क्रीणीध्वे॥क्रीणे॥क्रीणीवहे॥
क्रीणीमहि॥विधिसंभावनयोः॥क्रीणीत॥क्रीणीयातां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आशी॰

क्रीणीरन्॥क्रीणीतां॥क्रीणतां॥क्रीणतां॥क्रीणीष्व॥
क्रीणीथां॥क्रीणीध्वं॥क्रीणै॥क्रीणावहै॥क्रीणामहै॥
अक्रीणीत॥अक्रीणातां॥अक्रीणत॥अक्रीणीथाः॥
अक्रीणाथां॥अक्रीणीध्वं॥अक्रीणि॥अक्रीणीवहि॥
अक्रीणीमहि॥इत्यादि॥ग्रह उपादाने॥अकार उच्चा
रणार्थः॥ग्रसं कुंतिच॥ग्रह ज्यावयैङ्कृञ्ध्रुवस्रक्क॥२
ज्यावयोहानौङ्कृञ्आङ्पूर्वोग्रधृताउनेवस्रकोतो॥व्यचूव्या
जीकारैः॥अ॰॥ज्यवोजवहीप्सायां॥भ्रस्जोपाकेभ्रस्ज्छेदने॥

हि॥क्रीणीमहि॥क्रीणीत॥क्रीणीतं॥क्रीणीत॥क्रीणीत॥क्रीणाम॥
क्रीणाम॥अक्रीणां॥अक्रीणीतां॥अक्रीणन्॥अक्रीणाः॥
अक्रीणीतं॥अक्रीणीत॥अक्रीणां॥अक्रीणीव॥अक्रीणी
म॥इयादिषु॥आत्मनेपदेषु॥क्रीणीते॥क्रीणाते॥क्रीण
ते॥क्रीणीषे॥क्रीणाथे॥क्रीणीध्वे॥क्रीणे॥क्रीणीवहे॥
क्रीणीमहि॥विधिसंभावनयोः॥क्रीणीत॥क्रीणीयातां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रीणीरन्॥क्रीणीतां॥क्रीणन्तां॥क्रीणतां॥क्रीणीष्व॥
क्रीणीथां॥क्रीणीध्वं॥क्रीणै॥क्रीणावहै॥क्रीणामहै॥
अक्रीणीत॥अक्रीणातां॥अक्रीणन्॥अक्रीणीथाः॥
अक्रीणाथां॥अक्रीणीध्वं॥अक्रीणि॥अक्रीणीवहि॥
अक्रीणीमहि॥इत्यादि॥ग्रह उपादाने॥अकार उच्चा
रणार्थः॥प्रसंकुर्वन्ति च॥ग्रहज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां
ज्यावयोहानौ॥ङ्कुञ्॥आङ्पूर्वो॥ग्रह ताडने॥वष्टि कान्तौ॥व्यथ्य
जीकारे॥अ[illegible]ज्जीप्सायां॥भ्रस्ज्॥पाके॥ऋच्छ दन=

अत्र त्रिपः ॥ तेषिना प्रसयोः ॥ तिप्तिप्तस्तेरेफस्य ऋकारः सं प्रसार्य

रेयः

ग्रहेः प्रेषेः भ्रस्जेः ब्रश्चादीनां किति ङिति च परे संप्रसारणं भवति रेफस्य ऋकारः यकारः वैकारः वकारस्य उँ उँ ॥ ऋ २

गृह्णाति ॥ गृह्णीतः ॥ गृह्णन्ति ॥ गृह्णासि ॥ गृह्णीथः ॥ गृह्णीथ ॥ गृह्णामि ॥ गृह्णीवः ॥ गृह्णीमः ॥ विधिसं ॥ गृह्णीयात् ॥ गृह्णीयातां ॥ गृह्णीयुः ॥ गृह्णीयाः ॥ गृह्णीयातं ॥ गृह्णीयात ॥ गृह्णीयां ॥ गृह्णीयाव ॥ गृह्णीयाम ॥ आशी ॥ गृ

२७

॥२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतु॥ गृहीता॥ गृहीतां॥ गृह्णंतु॥ हौ विशेषमाह॥ हस्य
चेदहे॥ हसांतात्त्र्यादेर्गुणादानः प्रत्ययोऽवति॥ हौ
परे ना प्रत्ययः॥ अस्वीति हेर्लोपः॥ गृहाण॥ गृह्णीतां॥
गृहीतं॥ गृहीत॥ गृहाणि॥ गृहाव॥ गृहाम॥ अनद्यतने॥
अगृह्णात्॥ अगृह्णीतां॥ अगृह्णन्॥ अगृह्णाः॥ अगृह्णी
तं॥ अगृहीत॥ अगृह्णं॥ अगृह्णीव॥ अगृह्णीम॥ शेषं ग्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मनेपदे क्रणातिवन्नेयं। ग्रहीते। गृह्णाते॥ गृह्णते
गृह्णीषे। गृह्णाथे। गृह्णीध्वे। गृह्णे। गृह्णीवहे। गृह्णीमहे
विधिस्थ। गृह्णीत। गृह्णीयाताम्। गृह्णीरन्॥ अनी। गृ
ह्णीताम्। गृह्णाताम्। गृह्णताम्॥ अनद्यतने। अगृह्णीत अगृ
ह्णाताम्। अगृह्णत। अगृह्णीथाः॥ इत्यादि॥ पुष पुष्टौ।
वर्तमाने। पुष्णाति। पुष्णीतः। पुष्णन्ति। पुष्णासि। पुष्णी
थः। पुष्णाथ। पुष्णामि। पुष्णीवः। पुष्णीमः। विधि। पुष्णी

२८

२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यात्॥पुक्षीयातां॥पुक्षीयुः॥पुक्षीयाः॥पुक्षीयातं॥
पुक्षीयात॥पुक्षीयां॥पुक्षीयाव॥पुक्षीयाम॥पुक्षातु॥
पुक्षीताद्॥पुक्षीतां॥पुक्षंतु॥पुक्षाण॥पुक्षीताद्॥
पुक्षीतं॥पुक्षीत॥पुक्षानि॥पुक्षाव॥पुक्षाम॥अपु
क्षात्॥अपुक्षीतां॥अपुक्षन्॥अपुक्षाः॥अपुक्षीतं॥
अपुक्षीत॥अपुक्षां॥अपुक्षीव॥अपुक्षीम॥[illegible]॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुस्थिता॥सुस्थितः॥सुस्थितौ॥सुस्थितौ॥सुस्थीयात्॥सु
स्थीयातां॥सुस्थीयुः॥आशी॥सुस्थात्॥सुस्थीतां॥सु
स्थीतां॥सुस्थांतु॥सुस्थाणइत्यादि॥असुस्थात्॥असुस्थी
तां॥असुस्थन्॥इत्यादि॥एवंसर्वत्रैरिणक्रियाइष्ट
याएतच्चैवशक्तिचतुष्टयंसार्वधातुकसंज्ञंपरमा
धातुसंज्ञंपाणिनीयानांअथभावकर्मणोर्थ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आरंभ

क्रियाक्रियानिरप्यते॥आङ्गुविकर्मणि॥अवूर्म
केभ्योधातुभ्योजुविभावेसकर्मकेभ्यःअकर्मण्य
भरेपदंभवति॥षेचकर्मनिरपेक्षक्रियामाङुस्तधातो
चअकर्मकः॥नरएचआसएधिआङ्प्रभृतयःयकृच
तुर्थ्यंतोभावेकर्मणिचयथाप्रसयोभवतिचतुर्थी
पूर्वोक्तेषुपरतःएकारोगुणप्रतिषेधार्थं॥एधात्वे
[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

=हालज्ञायांरसस्तायांष्ठागतनीरतोरज्जागरणे ज्ञाने२
=एकरहोहीक्षयेसिद्धमये२ चि२ वाइ:खप्ने२
=जिवप्राणेधारणे२ मेइ:प्राणयोगे
र्थंक्रेवलःशुद्धभावइत्यभिधीयतेतज्ज्ञानसत्तास्थि
तिजागरणंरद्धेयमेयस्थितमरणंस्वप्नक्रो
डरीचिदीप्यर्थधातुगणेतमकर्मकमाङ्:॥७॥१०
भावेस्थेकरोदकवचनमेवभवति॥प्रथमपुरुष
स्य॥श्रूयतेभवता॥एध्यतेधात्मर्मिकैः॥आसउ
पवेशने॥आस्यतेसङ्घः॥विधि०॥आस्यत॥आसी०॥
अकर्मकआत्मनेपदार्थः

हालज्ञ
जिर
स्वप्न
३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आस्यतां॥ आसयतां॥ आसयतां॥ अस्यतनेनेति॥ आस्य
ता॥ आसयतां॥ आसयतां॥ शीङ् स्वप्ने॥ शीङ्ग्रोयङ्यपि च
कृत्यः॥ शय्यते श्रद्धेण॥ शय्यते॥ शय्यतां॥ अशय्यत॥
इत्यादि॥ अकर्मकोपि कदाचित्सकर्मकतां अनुभवति॥
उपसर्गेणधात्वर्थोबलादन्यत्र नीयते॥ विहारहारसंह
रप्रहारप्रतिहारवत्॥ धात्वर्थं बाधते कूपि तत्रापि

नागणेश्वा वि तेडुदयोट्टनां दस्तं कृत्स्ति त्रपलाद्दि कौ द्व्येसक
मितामो दुमोपारकर्ट गंपर ॥२॥३

श्री
ण
घ्रमे

न्नमनुवर्त्तते ॥ विश्रिनष्टितमेवार्थमुपसर्गश्चिधा
मतः ॥ २॥ सुखमनुभूयते स्वामिनाऽयेतुकर्म्मसाधे
क्षांक्रियामाऽसौसकर्म्मकाः ॥ कटः क्रियते ॥ स्वंदुःखी
ऋ यद्वैरागेः ॥ विरागेः सुख्यहंक्रियेः ॥ अयक्रियाकर्का
रस्यरिङादेशोसर्वेअकारेप्रययेयाकृचपरे ॥ सर्वे

सि २

शेषबधानार्थः

॥३९॥

नि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰कारो व्यवधानार्थः॥ क्रियते। क्रियेते। क्रियंते॥ विधि॰॥
क्रियेत। क्रियेयातां॥ क्रियेरन्॥ आशिषि॥ क्रियतां। क्रि
येतां। क्रियंतां॥ अनद्यत॰॥ अक्रियत॥ अक्रियेतां॥ अक्रि
यंत॥ इत्यादि॥ मृङ् प्राणत्यागे॥ म्रियते। म्रियेत। म्रिय
तां। अम्रियत॥ इत्यादि॥ हृङ् आदरे॥ आङ् उपसर्गपूर्वः॥
पूर्ववद्यक्सूत्रेण रिङ्॥ दानमाह्रियते॥ आह्रियेते॥
आह्रियंते। आह्रियेते॥ इत्यादि॥ हृञ् हरणे॥ ऋकारउप॰॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जिपुते को धनं चौरेण क्रियते। क्रियते इत्यादि। चिञ्
चयने। ये। यकारे परे पूर्वस्य दीर्घो। सवात। इष्टिक्रा श्री
यते। ऊ। मादनयोः। क्रयते अन्नं वह्नौ। क्रयेते।
क्रयेते। क्रयसे। क्रयेथे। क्रयध्वे। क्रये। क्रयावहे।
क्रयामहे। इत्यादि। डुदाञ् दाने। ददे। दत्थे। ददे। दद्वहे।
तेराकारस्य इकारादेशो भवति क्ङिति ङिति च परे।
वेदवेदीयते। दीयेते दीयते। इत्यादि। डुधाञ् धारण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण्पोष ण्यो॥ निष्टर्वः॥ निधीयते धान्यं कर्मो॥ निधी
यते॥ निधीयते॥ इत्यादि॥ माङ् माने॥ ङ्कार आत्मने
पदार्थः॥ एवं दीङ्कारदेशः॥ मीयते। मायते। मायते॥
इत्यादि॥ क्रैगैरैङ्ग्रे॥ संध्यक्षरा णामा॥ संध्यक्षरा
णां धातूनां आत्वं भवति अनापि विषये॥ क्रीयते। क्रीये
ते। क्रीयते॥ जीयते। जीयते। जीयते॥ रीयते। रीयते। री
यते॥ इत्यादि॥ शीतन्त्वरणे॥ त्रीयते। त्रीयते। त्रीये
ते॥ शोऽतकर्मणि॥ सीयते॥ इत्यादि॥ ओहाक्त्यागे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हीयते। हीयेते। हीयंते। इत्यादि। पापाने। पीयते पीयेते
पीयंते। इत्यादि। छागतिनिवृत्तौ। आदेः छः छः। इ
तिषकारस्य सकारः। निमित्ताभावे नैमित्तिकस्याप्यभावः।
इति ठकारस्य थकारः। स्थीयते। स्थीयेते। स्थीयंते। इत्या
दि। तनु विस्तारे। उकारउच्चारणार्थः। तनोति नीवा।
तनोति धर्तो नकारस्य वा आत्वं भवति यद्विपरे। ताय
ते। तन्यते। ऋ गतौ। गुणोऽर्तिसंयोगाद्योः। ऋगता
वियस्य धातोः संयोगादेर्ऋवर्णस्य च गुणो भवति क्ङिति।
देभवखंडनोदीयते ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति च परे ॥ अर्य्यते । अर्य्येते । अर्य्यंते ॥ इत्यादि ॥ स्मृञ् स्म
रणे ॥ अकारउभयपदार्थः ॥ स्मर्य्यते ॥ स्मर्य्येते । स्मर्य्यं
ते इत्यादि ॥ क्रियमाणतुयत्कर्म स्वयमेव प्रसिध्यति ॥ सु
करैः स्वैर्गुणैर्यस्मात्कर्मकर्त्तेति तद्विदुः ॥ १ ॥ प्यादयो
ऽन्यांतनिःकर्मगत्यर्थाद्युरव्यकर्मणि ॥ प्रत्ययं यांतिदुह्या
दिर्गौणेन्येतुयथारुचि ॥ २ ॥ यत्कर्मगुणसंयोगात्कर्तृत्वे
नविवक्ष्यते ॥ सकर्मकर्त्ता ॥ तत्राप्येतदेवोदाहरणं ॥ क
र्तृयद्विवक्षया ॥ पच्यतेऽोदनःस्वयमेव ॥ पचेते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पच्यंते ॥ इत्यादि ॥ षिदिरविदारणे ॥ इरनुबंध इरितो
वेतिविशेषणार्थे ॥ षिद्यते काष्ठं स्वयमेव ॥ षिद्येते षि
द्यंते ॥ इत्यादि ॥ लूञ् छेदने ॥ ञकारउभयपदार्थः ॥ लूयते
केदारः स्वयमेव ॥ लूयेते लूयंते ॥ इत्यादि ॥ द्विकर्मकस्यो
दाहरणं ॥ णीञ् प्रापणे ॥ ञकारउ० ॥ आदेः हनः स्नः ॥ इ
ति नकारस्य नकारः ॥ नकरं नीयते नागरिकैर्वनेचरः ॥ नी
येते ॥ नीयंते ॥ इत्यादि ॥ डुयाचृ याचायां ॥ डुकारऋकारा
वनुबंधौ कार्यार्थौ ॥ भोजनं याच्यते यजमानो याचकेन ॥ या
च्यते ॥ याच्येते ॥ विधौ ॥ याच्येत ॥ याच्येयाती ॥ याच्येरन् ॥

॥३५॥ ॥३४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आशी४॥ याच्यतां। याच्येतां। याच्यंतां॥ अनंघत॥
अयाच्यत। अयाच्येतां। अयाच्यंत॥ इत्यादि॥ प्रछ
ज्ञीप्सायां॥ यहां किङि॰ ति-चेति संप्रसारणं॥ पृच्छते
पंथानं पथिकेन पांथः४॥ पृच्छेते॥ पृच्छंते॥ पृच्छसे
पृच्छेथे। पृच्छध्वे॥ पृच्छे॥ पृच्छावहे॥ पृच्छामहे॥
विधिसंभावनयोर्यादादयः४॥ पृच्छेत। पृच्छेयातां॥ पृच्छे
रन्॥ पृच्छेथाः४॥ पृच्छेयाथां॥ पृच्छेध्वं॥ पृच्छेय॥ पृच्छे
वहि॥ पृच्छेमहि॥ आशी४॥ पृच्छतां॥ पृच्छेतां। पृच्छंतां॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पछ्यस्व॥पछ्येथां॥पछ्यध्वं॥पछ्ये॥पछ्यावहै॥प
छ्यामहे॥अनद्य०॥अपछ्यत॥अपछ्येतां॥अप
छ्यंत॥इत्यादि॥याच्यर्थेऽपि प्रछ्रधिब्रूग्रास
नीवहाः॥ हृदेङ्ग्रहकर्मणोः॥
१॥ ॥पुनः कर्तरि प्रणीयते॥ ॥परोक्षे॥णल्॥अ
लस्उस्।थल्।अथुस्।अ।णल्।व।म।ए।आते।इरे
से।आथे।ध्वे।ए।वहे।महे॥धातोः परोक्षे तीते काले
गबादयः प्रत्ययाः स्युरिति॥एषां चः स्युः पाणिनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नायानांसंज्ञालिट्॥णकारोऽध्यर्थः॥पकारपिङ्गा
र्थः॥ऋऽऽतिस्त्रीत॥ऋ॥णवादिसंयोगोभातो
र्द्वचनं॥आभ्वोर्णादौ॥पूर्वस्याकारस्यऋऋकस्य
चाकारादेशोभवतिणवादौपरेसति॥ऋत्यः॥एर्वसं
बंधिनोदीर्घस्यह्रस्वोभवति॥ऋपानाजवजपाः॥
इतिप्रकारः॥भुवोवुक्॥भुवोवुकागमोभवतिणवा
दौपरेसति॥ककारस्योच्चारणार्थः॥उकारउच्चा

शा २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रणार्थः॥ब्रूत्वा॥ब्रूत्वा॥ब्रूत्वा॥क्तादेर्णीदेः॥स्
स्यरसादेरिडागमोनभवति॥अन्यस्माद्भवतीति
नियमादिडागमः॥ब्रूवीथः॥ब्रूवथुः॥ब्रूवा
ब्रूव॥ब्रूविवा॥ब्रूविम॥वलिर्वलवान्ब्रूवा॥
अतउपधायाः॥धातोरुपधायाअकारस्यवृद्धिर्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वति॥ त्रितिणिति च प्रत्ययेयेपरतः॥ उपचुष पाके॥ इ
र्वस्य हसादिः शेषः॥ एर्वस्य आदिहिसः शिष्यते अ
ञ्चेत्तुप्यंते॥ पपाच॥ णादिः कित्॥ णादिरपि कित्भव
ति॥ लोपः पंचांकिरेचास्य॥ पचादिनामनादेशौनां दी
कितिणादेसति एर्वस्य लोपो भवति॥ धातोर्यकार ३२
स्य चैकहलस्य कारः॥ पचतु॥ पेचुः॥ वैट्यं पः सेटः

= अत्तिव्वेदस्थपः स्यादिडयस्त्रिदत्रोर्णादेरेव तत्रानियानियमस्वरप्रस्तरवि
= रहितत्रघस्कतस्मात्तुनस्यात्॥ किंचयत्रो कर्मास्मन्नवतिखत्रतदयत्वलोपो
= विधातुनाच्यकार्यावदन्याद्रणिष्ठजगद्वारतिस्यष्टमाघामुनीश्वर=

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कि खंवावक्रयं॥पेचिया॥चोकुः॥पपक्ष॥पेचयुः॥पेच॥
पबुत्तमोवाणिदक्तव्यः॥ततोविकल्पेनवृद्धिः॥प
पाच॥पपाच॥पेचिव॥पेचीम॥आसन्नपदपिलोपा
दिपूर्ववत्॥पेचे॥पेचाते॥पेचिरे॥पेचिषे॥पेचाथे॥
पेचिध्वे॥पेचे॥पेचिवहे॥पेचिमहे॥इत्यजंतरणं॥
दिक्ष्वा॥रः॥पूर्वसंबंधिनकारस्य॥अकारादेशो

२७॥

२७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवति॥ कुरुष्व॥ सर्वसंबंधिनोक्तवर्गकारयो
श्चुरंभवति॥ इति चकारः॥ चरञ्ज इति स्थिते॥ आ
तोनोमिनुः॥ धातोरंत्यस्य नामिनोऽङ्गस्य भवति
ञिति णिति च परे॥ चकार॥ चक्रतुः॥ चक्रुः॥ चकर्थ॥
चक्रथुः॥ चक्र॥ चकार॥ चकर॥ चकरव॥ चकरम॥ एमो
राज्यं चकारा॥ आत्मनेपदेषु॥ चक्रे॥ चक्राते॥ चक्रिरे॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चरूषे॥चक्राथे॥नामिनोचतुर्णांधोडः॥नामंयतातुधातोरुत्तरस्यध
कारस्यढत्वंभवतितिबादीनांचतुर्णांसंबंधिनोनभवति॥
चरढ्वे॥चक्रे॥चकृवहे॥चकृमहे॥असृरवि॥अस्तेर्भूः॥
अस्तेर्भूरादेशोभवतिअनर्णिषये॥बभूव॥बभूवतुः॥
बभूवुः॥इसादि॥आसउपवेशने॥अकारउच्चारणार्थः॥
सर्ववदत्राणिणबादिप्रयोगः॥द्विर्वचनं॥सवर्णदी

॥३८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति १

र्चसहदीर्घत्वं॥आस॥आसतुः॥आसुः॥आसिथ॥
आस्थ॥आसथुः॥आस॥आस॥आसिव॥आसि
म॥इयादि॥कासृादिप्रत्ययात्परस्मैपदं॥कासा
देर्धातोः प्रत्ययात्ताच्चणबोर्यैपरआम्प्रत्ययोभव
ति॥चेर्सेरअसरूपरः प्रयोक्तव्यः॥कासांचक्रे॥कासांचक्रा
तुः॥ऋकारकार्यार्थं॥कासांचक्रे॥कासांचक्रा

आत्मनेपदी ८२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते॥ कासांचत्त्रिरे॥ कासांचत्रषे॥ कासांचत्रा थे॥
कासांचत्रद्वे॥ कासांचत्रे॥ कासांचत्रत्रहे॥ कासां
कासांचत्रमहे॥ कासामासा॥ कासामासत्तु॥ कासां
मासत्तु॥ कासांचभ्रत्वा॥ कासांबभ्रत्वतु॥ कासांबभ्र
वुः॥ इत्यादिपाठांचकासदीपे॥ चकासांचकारा॥
चकासांचकतुः॥ चकासांचक्रुः॥ चकासांचक्रुर्थ॥

३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंशस्य प्रस्थात्रस्य यातिरिक्तात्या भिः स्यंतेनगु
णोभवत्येव ॥५॥

चकासांचकृथुः॥चकासांचक्रा॥चकासांचकार॥
चकासांचकाथ॥चकासांचकृव॥चकासांचकृम॥
चकासामासा॥चकासामासतुः॥चकासामासुः॥
चकासांचभूव॥चकासांबभूवतुः॥चकासांबभूवुः
रिसादि॥जागरिता॥जागरांचकार॥जागरां
रांचक्रतुः॥जागरांचक्रुः॥जागरामास॥जागरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मासतुः॥जागरामासुः॥जागरांबभूवतुः॥जागरांब
भूवतुः॥जागरांबभूवुः॥इत्यादि॥एधरक्षौ॥एधां
चक्रे॥एधांचक्राते॥एधांचक्रिरे॥एधामास॥ए
धामासतुः॥एधामासुः॥एधांबभूव॥एधांब
भूवतुः॥एधांबभूवुः॥इत्यादि॥विदज्ञाने॥अ
कारउच्चारर्थः॥उपधायाल्घोरिण्यनेनशाप॥

॥५२॥ ॥५३॥

उपधायाल्घोः॥धातोरुपधायानामिनोल्घोर्गुणोभवति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्यस्यतु भवति ।

स्य गुणस्यापवादः ॥ आभिविदेर्न गुणः ॥ आभिपरेर्वि
दे र्गुणो न भवति ॥ विदांचकार ॥ विदांचक्रतुः ॥ विदांचक्रुः ॥
विदामास ॥ विदामासतुः ॥ विदामासुः ॥ विदांबभू
व ॥ विदांबभूवतुः ॥ विदांबभूवुः ॥ इणादिभ्य ईक्षद
र्शनांकनयोः ॥ ईक्षांचक्रे ॥ ईक्षांचक्राते ॥ ईक्षांच
क्रिरे ॥ ईक्षामास ॥ ईक्षामासतुः ॥ ईक्षामासुः ॥ ई

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षांबभ्रव॥ईक्षांबभ्रवतुः॥ईक्षांबभ्रवुः॥इत्यादि॥
ऊहवितर्के॥ऊहंचक्रे॥ऊहंचक्रांते॥ऊहंचक्रिरे॥
ऊहांमास॥ऊहांमासतुः॥ऊहांमासुः॥ऊहांबभ्रव॥
ऊहांबभ्रवतुः॥ऊहांबभ्रवुः॥इत्यादि॥इति कासा
द्यः॥ष॥अधुनाप्रत्ययांतेभ्यआम्प्रत्यिरूप्यते॥
ऋऋकरणे॥इयायामासनः सः॥धातोरिष्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मर्थेसःप्रत्ययोभवतिसाचेत्तत्संबंधानिश्चि॥ऋ
तइ॥ऋकारस्यइराटेशोभवतिकिति ङि॰तिचण
शे॥इकिरसुइतिस्थिते॥यःसे॥इश्चअश्चयः॥अ
कारःएवइकारोभवति सेपरे॥किकिरसुइतिस्थि
ते॥कुतोश्चुरितिचकारः॥चिकीरसइतिस्थिते॥कि
ष्ठासःसःरुतस्यइतिषत्वं॥चिकिरषुइतिस्थिते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जञ्चतुर्विकारायेनरेफस्योद्धेगयुनं॥सधातुः॥
यञादिप्रत्ययांतश्चाद्धोधातुसंज्ञेभवति॥धातु
वाण्णवादयः॥कासादिप्रत्ययादामू॥चिकी
र्षांचकार॥चिकीर्षांचक्रतुः॥चिकीर्षांचक्रुः॥
चिकीर्षांचकर्थ॥चिकीर्षांचक्रथुः॥चिकीर्षांच
क्र॥चिकीर्षांचकार॥चिकीर्षांचकर॥चिकी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्षीचरु॥ चक्रर्षीचरुस्य॥ चिकीर्षीमासु॥ चिकि
र्षीमासचुः॥ चिकिर्षमासुः॥ किचिर्षीमोथि॥ सि२
चिकिर्षीमास्य॥ चिकिर्षीमासथुः॥ चिकिर्षी
मास॥ चिकिर्षीमास॥ चिकिर्षीमिव॥ चिकि मा२
र्षीमासिम॥ चिकिर्षीवहे॥ चिकिर्षीवहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वडु॥चिकीर्षाबरखु॥चिकिर्षाबरथि॥चि
किर्षाबरवथु॥चिकिर्षाबरव॥चिकिर्षाबरू
व॥चिकिर्षाबरविव॥चिकिर्षाबरविमाद
र्यादा॥भरजपालनाभ्यवहारयो॥अकारणचा
रणार्थः॥भरजदतिरि[illegible]ते॥इवापासनार्थः॥
सर्वस्यहसादिःशेषः॥सर्वस्यआदिहसःशेष ४३

४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिऽरन्येन्तुपंते॥इतिऽकारलोपः॥सपानांजबचपा
इतिबकारः॥खसेचपाऽसानांमितिऽकारस्यच
कारः॥चोःकुरितिचकारस्यककारः॥क्षिप्तात्॥
कषसंयोगेदः॥बुद्धांचकारः॥बुद्धांचकतुः॥
बुद्धांचक्रुः॥बुद्धामासः॥बुद्धामासतुः॥बु
द्धामासुः॥बुद्धांबभूव॥इयाधिःआचार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सा०र०स्त०

रा०

४४

उपमानात्॥उपमानादर्थार्थयङ्त्रयोमवातस्पंड
तायांचक्रे॥पंडितायांचक्रुः॥पंडितायांचक्रिरे॥पंड
तायांचरुषे॥पंडितायांचक्राथे॥पंडितायांचरुध्वे॥ द्वि॥
